॥ श्रीः ॥

# ॥ आर्याद्वादशकम् ॥

उद्यन्नद्य विवस्वान् आरोहन्नुत्तरां दिवं देवः ।
हृद्रोगं मम सूर्यो हरिमाणं चाशु नाशयतु ॥ १

निमिषार्धेनैकेन द्वे च शते द्वे सहस्रे च ।
क्रममाणयोजनानां नमोऽस्तुते नळिननाभाय ॥ २

शिवरूपात्ज्ञानमहं त्वत्तो मुक्तिं जनार्दनाकारात् ।
शिखिरूपादैश्वर्यं भवतश्चारोग्यमिच्छामि ॥ ३

कर्मज्ञानखदशकं मनश्च जीव इति विश्वसर्गाय ।
द्वादशधा यो विचरति स द्वादशमूर्तिरस्तु मुदे ॥ ४

त्वं यजुरृक्साम त्वमागमस्त्वं वषट्कारः ।
त्वं विश्वस्त्वं हंसस्त्वं भानुः परमहंसश्च ॥ ५

त्वचिदोषादृशिदोषा हृदिदोषा
येखिलेन्द्रियदोषाः ।
तान् पूषा हतदोषा-
नीषद्रोषाग्निना दहतु ॥ ६

तिमिरमिव नेत्रतिमिरं पटलमिव अशेषरोगपटलं च ।
काचमिव धीनिकाचं कालपिता मम निराकुर्यात् ॥ ७

धर्मार्थकाममोक्ष प्रतिरोधिन उग्रवेगतापकरान् ।
मन्दीकृतेन्द्रियगणान् गदान् विनाशयतु चण्डांशुः ॥ ८

येन विनाऽन्धन्तिमिरं जगदेतद्यत्र च दृढबोधम् ।
तं नळिनीभर्तारं हर्तारं चापदामीडे ॥ ९

यस्य सहस्त्रा भीशोर भीशुलेशो हिमांशुबिम्बगतः ।
भासयति नक्तमखिलं खिलयतु सविपद्गणानखिलान् ॥ १०

वाताश्मरीदुर्नाम त्वग्दोषमहोदरप्रमेहांश्च ।
ग्रहणीभगन्दरमुखान् महारुजोऽपि त्वमिनहरास ॥ ११

त्वं शरणं त्वं माता त्वं पिता त्वं धनं त्वमाचार्यः।
त्वं त्राता त्वं हर्ता विपदामर्क प्रसीद मम ॥ १२

इत्यार्याद्वादशकं साम्बस्य पुरो नभस्तलात्पतितम् ।
पठतां भाग्यसमृद्धिः समस्तरोगोपशान्तिश्च ॥ १३

इति आर्याद्वादशकं सम्पूर्णम् ॥

